॥ ॐ श्रीपरमात्मने नमः ॥
॥ अथ सप्तमोऽध्यायः ॥
॥ ज्ञानविज्ञान योगः ॥

श्रीभगवानुवाच
मय्यासक्तमनाः पार्थ  योगं युञ्जन्मदाश्रयः ।
असंशयं समग्रं मां  यथा ज्ञास्यसि तच्छृणु ॥ ७-१॥

ज्ञानं तेऽहं सविज्ञानम्  इदं वक्ष्याम्यशेषतः ।
यज्ज्ञात्वा नेह भूयोऽन्यत्  ज्ञातव्यमवशिष्यते ॥ ७-२॥

मनुष्याणां सहस्रेषु  कश्चिद्यतति सिद्धये ।
यततामपि सिद्धानां  कश्चिन्मां वेत्ति तत्त्वतः ॥ ७-३॥

भूमिरापोऽनलो वायुः  खं मनो बुद्धिरेव च ।
अहङ्कार इतीयं मे  भिन्ना प्रकृतिरष्टधा ॥ ७-४॥

अपरेयमितस्त्वन्यां  प्रकृतिं विद्धि मे पराम् ।
जीवभूतां महाबाहो  ययेदं धार्यते जगत् ॥ ७-५॥

एतद्योनीनि भूतानि  सर्वाणीत्युपधारय ।
अहं कृत्स्नस्य जगतः  प्रभवः प्रळयस्तथा ॥ ७-६॥

मत्तः परतरं नान्यत्  किञ्चिदस्ति धनञ्जय ।
मयि सर्वमिदं प्रोतं  सूत्रे मणिगणा इव ॥ ७-७॥

रसोऽहमप्सु कौन्तेय  प्रभास्मि शशिसूर्ययोः ।
प्रणवः सर्ववेदेषु  शब्दः खे पौरुषं नृषु ॥ ७-८॥

पुण्यो गन्धः पृथिव्यां च तेजश्चास्मि विभावसौ ।
जीवनं सर्वभूतेषु तपश्चास्मि तपस्विषु ॥ ७-९॥

बीजं मां सर्वभूतानां विद्धि पार्थ सनातनम् ।
बुद्धिर्बुद्धिमतामस्मि तेजस्तेजस्विनामहम् ॥ ७-१०॥

बलं बलवतां चाहं कामरागविवर्जितम् ।
धर्माविरुद्धो भूतेषु कामोऽस्मि भरतर्षभ ॥ ७-११॥

ये चैव सात्त्विका भावाः राजसास्तामसाश्च ये ।
मत्त एवेति तान्विद्धि न त्वहं तेषु ते मयि ॥ ७-१२॥

त्रिभिर्गुणमयैर्भावैः एभिः सर्वमिदं जगत् ।
मोहितं नाभिजानाति मामेभ्यः परमव्ययम् ॥ ७-१३॥

दैवी ह्येषा गुणमयी मम माया दुरत्यया ।
मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥ ७-१४॥

न मां दुष्कृतिनो मूढाः प्रपद्यन्ते नराधमाः ।
माययाऽपहृतज्ञानाः आसुरं भावमाश्रिताः ॥ ७-१५॥

चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन ।
आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ॥ ७-१६॥

तेषां ज्ञानी नित्ययुक्तः एकभक्तिर्विशिष्यते ।
प्रियो हि ज्ञानिनोऽत्यर्थम् अहं स च मम प्रियः ॥ ७-१७॥

उदाराः सर्व एवैते ज्ञानी त्वात्मैव मे मतम् ।
आस्थितः स हि युक्तात्मा मामेवानुत्तमां गतिम् ॥ ७-१८॥

बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते ।
वासुदेवः सर्वमिति स महात्मा सुदुर्लभः ॥ ७-१९॥

कामैस्तैस्तैर्हृतज्ञानाः प्रपद्यन्तेऽन्यदेवताः ।
तं तं नियममास्थाय प्रकृत्या नियताः स्वया ॥ ७-२०॥

यो यो यां यां तनुं भक्तः श्रद्धयाऽर्चितुमिच्छति ।
तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम् ॥ ७-२१॥

स तया श्रद्धया युक्तः तस्याराधनमीहते ।
लभते च ततः कामान् मयैव विहितान् हि तान् ॥ ७-२२॥

अन्तवत्तु फलं तेषां तद्भवत्यल्पमेधसाम् ।
देवान्देवयजो यान्ति मद्भक्ता यान्ति मामपि ॥ ७-२३॥

अव्यक्तं व्यक्तिमापन्नं मन्यन्ते मामबुद्धयः ।
परं भावमजानन्तः ममाव्ययमनुत्तमम् ॥ ७-२४॥

नाहं प्रकाशः सर्वस्य योगमायासमावृतः ।
मूढोऽयं नाभिजानाति लोको मामजमव्ययम् ॥ ७-२५॥

वेदाहं समतीतानि वर्तमानानि चार्जुन ।
भविष्याणि च भूतानि मां तु वेद न कश्चन ॥ ७-२६॥

इच्छाद्वेषसमुत्थेन द्वन्द्वमोहेन भारत ।
सर्वभूतानि सम्मोहं सर्गे यान्ति परन्तप ॥ ७-२७॥

येषां त्वन्तगतं पापं जनानां पुण्यकर्मणाम् ।
ते द्वन्द्वमोहनिर्मुक्ताः भजन्ते मां दृढव्रताः ॥ ७-२८॥

जरामरणमोक्षाय मामाश्रित्य यतन्ति ये ।
ते ब्रह्म तद्विदुः कृत्स्नम् अध्यात्मं कर्म चाखिलम् ॥ ७-२९॥

साधिभूताधिदैवं मां  साधियज्ञं च ये विदुः ।
प्रयाणकालेऽपि च मां  ते विदुर्युक्तचेतसः ॥ ७-३०॥

ॐ तत्सदिति श्रीमद् भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे ज्ञानविज्ञानयोगो नाम सप्तमोऽध्यायः ॥ ७॥

With Blessings from:
Sri. Sri. Sugunendra Theertha Swamiji, Puthige Mutt, Udupi, India
Sri Krishna Vrundavana, NJ, USA
http://krishnavrunda.org/